CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library
S.D.P.B.

Coll. No. 385.

Title Viṣṇu sahasra divya

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 385.

Subject : Stotra

Title : Viṣṇu sahastra divya nāma

Author : —

Scribe : Bhadraśankara

Date of the work : —

Date of the Ms. : —

Place of the work : —

Place of the Ms. : —

Size : 8.8" by 4.8"

Extent : 16 foll

Language : Sanskrit

Script : Devanāgarī

Remarks :

॥ अस्य श्रीवासुदेवसहस्रनामस्तोत्रमालामंत्रस्य श्रीवेदव्यास ऋषिः अनुष्टुप्
छंदः॥ श्रीकृष्णपरमात्मा देवता॥ आत्मयोनिः स्वयंजात इति बीजं॥ देवकीनंदन
स्रष्टेति शक्तिः॥ उद्भवः क्षोभणो देव इति मंत्रः॥ शंखभृन्नंदकी चक्रीति कीलकं
त्रिसामा सामगः सामेति कवचं॥ शार्ङ्ग धन्वा गदाधर इत्यस्त्रं॥ विश्वं विष्णुर्वषट्
कार इति ध्यानं॥ श्रीविष्णुप्रीत्यर्थे दिव्यसहस्रनामपाठे विनियोगः॥
ॐ शिरसि वेदव्यासऋषये नमः॥ मुखे अनुष्टुप् छंदसे०॥ हृदि श्रीकृष्णपरमात्मा देवता
यै०॥ गुह्ये अमृतांशूद्भवो भानुरिति बीजाय०॥ पादयोः देवकीनंदनस्रष्टेति शक्तये०॥ सर्वां
गे शंखभृन्नंदकी चक्रीति कीलकाय०॥ करसंपुटे श्रीकृष्णप्रीत्यर्थे जपे विनियोगः॥
ॐ विश्वं विष्णुर्वषट्कार इत्यंगुष्ठाभ्यां नमः॥ अमृतांशूद्भवो भानुरिति तर्जनीभ्यां०॥ ब्रह्मण्यो ब्रह्मकृ
द्ब्रह्मीति मध्यमाभ्यां०॥ सुवर्णबिंदुरक्षोभ्य इत्यनामिकाभ्यां०॥ आदित्यो ज्योतिरादित्य इति कनि
ष्ठिकाभ्यां०॥ शार्ङ्गधन्वा गदाधर इति करतलकरपृष्ठाभ्यां०॥ एवं हृदयादि॥ ॥ध्यानं॥ शांता०
॥ मेघश्यामं पीतकौशेयवासं श्रीवत्सांकं कौस्तुभोद्भासितांगं॥ पुण्योपेतं पुंडरीकायताक्षं विष्णुं वंदे स
र्वलोकैकनाथं॥ १॥

विश्वशब्देनओंकारोऽभिधीयते॥ सर्वं खल्विदं ब्रह्म तस्मादोंकारविश्वयोरभेदः १ विष्णुर्व्याप्तिर्निधापि-
नः विष्णुरिति २ यज्ञो वषट्कारादिवर्णात्मना देवान्प्रीणातीति वषट्कारः ३ भूतं च भव्यं च भवच्चेति तेषां
प्रभुः भूतभव्यभवत्प्रभुः ४ रजोगुणमाश्रित्य भूतानि करोतीति तमोगुणमाश्रित्य भूतानि कृन्ततीति भूतकृत्
५ सत्त्वगुणमधिष्ठाय भूतानि बिभर्तीति भूतभृत् ६ प्रपञ्चरूपेण भवतीति भावः ७ भूतानां आत्मा अन्त-
र्यामि: भूतात्मा ८ भूतभावनः भूतानि भावयतीति ९ पूतः आत्मा यस्य सः पूतात्मा १० परमश्चासावात्मा
चेति कार्यकारणविलक्षण इत्यर्थः ११ मुक्तानां परमागतिः परमा उत्कृष्टा गतिः गन्तव्य देवतेत्यर्थः १२ नास्त्यव्ययो वि-
नाशो न विद्यत इत्यर्थः १३ आसीत्पुरा पूर्वमेवेति पुरुषः १४ साक्षादव्यवधानेन स्वरूपबोधेन पश्यति सर्वमिति सा-

॥श्रीगणेशायनमः॥श्रीर्जयति॥ ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभव
त्प्रभुः भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः १ पूतात्मा परमा
त्मा च मुक्तानां परमा गतिः अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च १
२ योगो योगविदां नेता प्रधानपुरुषेश्वरः नारसिंहवपुः श्रीमान्
केशवः पुरुषोत्तमः ३ सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः

क्षी १५ क्षेत्रं शरीरं जानातीति क्षेत्रज्ञः १६ न क्षरतीति अक्षरः १७ ज्ञानेन्द्रियाणि मनसा एकत्वभावनं योगः १८ यो-
गं विदन्तीति योगविदस्तेषां नेता १९ प्रधानं प्रकृतिः माया पुरुषः जीवः तयोरीश्वरः प्रधानपुरुषेश्वरः २० नरस्य इव सिं-
हस्य इव अवयवा यस्मिन् लक्ष्यन्ते तद्वपुर्यस्य० २१ यस्य वक्षसि नित्यं वसति श्रीः श्रीमान् २२ अभिरूपाः केशाः यस्य सः
२३ पुरुषाणां उत्तमः पुरुषोत्तमः २४ असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् सर्वः २५ प्रजाः संहारयतीति शर्वः २६ निस्त्रै-
गुण्यतया शुद्धत्वात् शिवः २७ स्थिरत्वात् स्थाणुः २८ भूतानामादिकारणत्वाद्भूतादिः २९ अविनश्वरो निधिः ३०
नास्त्यव्ययः प्रलयोऽस्येति अव्ययः ३१ स्वेच्छया

स्वेच्छया समीचीनं भवनं यस्य स संभवः ३२ सर्वेषां भोक्तॄणां फलानि भावयतीति भावनः ३३ प्रपञ्चस्य अधिष्ठानत्वेन भरणं भर्ता ३४
महाभूतानि यस्माज्जायन्ते इति प्रभवः ३५ सर्वासु क्रियासु सामर्थ्यातिशयात् प्रभुः ३६ निरुपाधिकं ऐश्वर्यं यस्य सः ई-
श्वरः ३७ तपरोनभावयतीति स्वयंभूः ३८ शं सुखं भक्तानां भावयतीति शंभुः ३९ आदित्यमण्डलान्तःस्थो हिरण्मयः
पुरुषः स विष्णुः ४० पुष्करोपमिते अक्षिणी यस्य पुष्कराक्षः ४१ महान् ऊर्जितः स्वनो श्रुतिलक्षणो नादो यस्य महा-
स्वनः ४१ जन्मविनाशः कृत्यं न विद्यते यस्य सः अनादिनिधनः ४२ अनन्तादिरूपेण विश्वं विधातीति धाता ४३ अ-
नन्तादीन्विधारकान्दधातीति विधाता ४४ विरञ्च्यादुत्कृष्ट इति धातुरुत्तमः ४५ षट्प्रमाणादिअविषयत्वेन अप्रमेयः
४६ हृषीकाणि इन्द्रियाणि तेषामीशः हृषीकेशः ४७
सर्वजगत्कारणं पद्मं नाभौ यस्य ४८ अमराणां प्रभुः अमरप्रभुः ४९ विश्वं कर्म यस्येति विश्वकर्मा ५० मननान्मनुः ५१ सं-

संभवो भावनो भर्ता प्रभवः प्रभुरीश्वरः ४ स्वयंभूः शंभुरादित्यः पुष्कराक्षो
महास्वनः अनादिनिधनो धाता विधाता धातुरुत्तमः ५ अप्रमेयो
हृषीकेशः पद्मनाभोऽमरप्रभुः विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थवि
रो ध्रुवः ६ अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः प्रभूतस्त्रि
ककुब्धाम पवित्रं मंगलं परं ७ ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः

संहारसमये सर्वभूततनूकरणेन त्वष्टा ५२ अतिशयेन स्थूलः इति स्थविष्ठः ५३ स्थिरत्वात् ध्रुवः स्थविरो ध्रुव इति सुविशेष-
णं ५४ कर्मेन्द्रियैर्न गृह्यत इति अग्राह्यः ५५ सर्वेषु लोकेषु भवतीति शाश्वतः ५६ कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः तयोरैक्यं परं ब्रह्म
कृष्ण इत्यभिधीयते तस्मात्कृष्णः ५७ लोहिते अक्षिणी यस्य स लोहिताक्षः ५८ प्रलये भूतानि हिनस्तीति प्रतर्दनः ५९ ज्ञानैश्वर्या-
दिगुणैः संपन्नः प्रभूतः ६० ऊर्ध्वाधोमध्यभेदेन तिसृणां ककुभां धामेति त्रिककुब्धाम ६१ येन पुनातीति ऋषिर्देवतात्मा पवित्रं ६२ कल्या-
णदायकत्वान्मंगलं ६३ उत्कर्षात्परं मंगलमित्यर्थः सर्वभूतानां नियन्तृत्वादीशानः ६४ प्राणान्ददातीति प्राणदः ६५ प्राणस्य प्राण-
त्वमिति प्राणः ६६ मुख्यप्राणो ज्येष्ठः ६७ सर्वातिशयाच्छ्रेष्ठः ६८ ॥ ॥ ॥

ईश्वरत्वेन सर्वासां प्रजानां पतित्वात्प्रजापतिः ६९ हिरण्यांडांतर्वर्त्तित्वाद्धिरण्यगर्भः ७० भूर्गर्भे यस्य सः भूगर्भः ७१ मायायाः श्रियाः धवः पतिः माधवः ७२ मधुनामानं दैत्यं सूदितवानिति मधुसूदनः ७३ सर्वशक्तिमत्त्वादीश्वरः ७४ विक्रमः शौर्यं तद्योगाद्विक्रमी ७५ धनुरस्यास्तीति धन्वी ७६ ग्रंथधारणसामर्थ्यं यस्यास्तीति मेधावी ७७ विचक्रमे जगद्येन सः विक्रमः ७८ क्रमणं क्रमः ७९ अविद्यमान उत्तमो यस्मात्सः अनुत्तमः ८० दैत्यादिभिर्धर्षयितुं न शक्यत इति दुराधर्षः ८१ प्राणिनां पुण्यात्मकं कर्मकृतं जानातीति कृतज्ञः ८२ पुरुषप्रयत्नः कृतिः ८३ स्वमहिम्नि स्थितत्वादात्मवान् ८४ सुरेशः सुराणां देवानां

प्रजापतिः हिरण्यगर्भो भूगर्भो माधवो मधुसूद-
नः ८ ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् ९ २
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः अहः
संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः १० अजः

नामीशः ८५ आर्त्तानामार्त्तिहरणत्वाच्छरणं ८६ परानंदरूपत्वाच्छर्म ८७ विश्वकारणत्वाद्विश्वरेताः ८८ सर्वाः प्रजाः यस्मात्संभवंतीति प्रजाभवः ८९ प्रकाशरूपत्वादहः ९० कालात्मना स्थितो विष्णुः संवत्सरः ९१ भुजंगवद्दुःशक्यत्वाद्व्यालः ९२ प्रकृतिं प्रत्येतीति प्रत्ययः ९३ सर्वदर्शनं ... सर्वदर्शनः ९४ उत्पत्तिनाशरहितः अजः ९५

अज इति

सर्वेषामीश्वराणामपि ईशत्वादीश्वरः ९६ नित्यविश्रान्त्यरूपत्वात्सिद्धः ९७ सर्ववस्तुषु संविद्रूपत्वात्सिद्धिः ९८ सर्वभूतानामाकारणत्वात्सर्वादिः ९९ स्वरूपसामर्थ्यान्न च्यवते अतो अच्युतः १०० वर्षणात्सर्वकामानां धर्मो वृषः कपिः वराहः तस्मात् वृषाकपिः १ परिच्छेत्तुं न शक्यते आत्मा अस्येति अमेयात्मा २ सर्वसंबंधविनिर्गतत्वात्सर्वयोगविनिःसृतः ३ वसंति सर्वभूतानि अस्मिन्निति वसुः ४ प्रशस्तं मनो यस्य वसुमनाः ५ पारमार्थिकसत्तारूपत्वात्सत्यः ६ समः आत्मा मनो यस्य रागद्वेषादिभिरदूषितः समात्मा ७ सर्वैरपरिच्छिन्नः असंमितः सर्वैः परिच्छिन्नः संमितो वा समात्मा ८ सर्वकालेषु सर्वविकाररहितत्वात्समः ९ सर्वफलं ददाति न वृथा करोतीत्यमोघः १० हृदया-

सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः वृषाकपिरमेयात्मा सर्वयोग-
विनिःसृतः ११ वसुर्वसुमनाः सत्यः समात्मा संमितः समः अमोघः
पुंडरीकाक्षो वृषधर्मा वृषाकृतिः १२ रुद्रो बहुशिरा बभ्रुर्विश्वयो-
निः शुचिश्रवाः अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः १३
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः वेदो वेदविदव्यंगो वेदां-

ख्यं पुंडरीकं तत्र उपलभ्यत इति पुंडरीकाक्षः ११ धर्मलक्षणं कर्म यस्येति वृषधर्मा १२ अमोघा आकृतिर्यस्येति वृषाकृतिः १३ संहारकाले प्रजाः संहरन् रोदयतीति रुद्रः १४ बहूनि शिरांसि अस्येति बहुशिराः १५ बिभर्त्ति लोकानिति बभ्रुः १६ विश्वकारणत्वेन विश्वयोनिः १७ शुचीनि श्रवांसि नामानि श्रवणीयानि अस्येति शुचिश्रवाः १८ न विद्यते मृतं मरणमस्येत्यमृतः १९ शाश्वतश्चासौ स्थाणुश्चेति शाश्वतस्थाणुः २० वरं आरोहणं अस्येति वरारोहः २१ महत्तपो ज्ञानं अस्येति महातपाः २२ सर्वत्र गच्छतीति सर्वगः २३ सर्वं वेत्तीति सर्ववित् भानातीति भानुः सर्ववित् चासौ भानुश्च सर्वविद्भानुः २४ विष्वक् अंचते पलायते दैत्यसेना यस्य स विष्वक्सेनः २५ दुर्जनान् अर्दयतीति निशमयतीति जनार्दनः २६ वेदयतीति वेदः २७ वेदार्थं विदयतीति वेदवित् २८ व्यंगो व्यक्तिर्न विद्यत इति अव्यंगः २९ वेदाः अंगीभूताः य-

स्येतिवेदांगः ३० वेदान्विचारयतीतिवेदवित् ३१ क्रांतदर्शीकविः ३२ लोकान् अध्यक्षयतीतिलोकाध्यक्षः ३३ सुराणां अध्यक्षःसुराध्यक्षः ३४ धर्माधर्मौसाक्षादीक्षते अनुरूपंफलंदातुंतस्माद्धर्माध्यक्षः ३५ कृतश्चकार्यरूपेण अकृतः कारणरूपेणेतिकृताकृतः ३६ सर्गादिषुपृथक् ४ विभूतयःसंतिअतःचतुरात्मा ३७ वासुदेवादिमूर्त्तिभिःसृष्ट्यादीन्करोतीतिचतुर्व्यूहः ३८ दंष्ट्राश्चतस्रोऽस्येतिचतुर्दंष्ट्रः ३९ चत्वारोभुजाःयस्येतिचतुर्भुजः ४० प्रकाशैकरसत्वाद्भ्राजिष्णुः ४१ भोग्यरूपतयाप्रकृतिर्माया भोजनं ४२ पुरुषरूपेणभुंक्तेइतिभोक्ता ४३ हिरण्याक्षादीन्सहते अभिभवतीतिसहिष्णुः ४४ हिरण्यगर्भरूपेण

गोवेदवित्कविः १४ लोकाध्यक्षःसुराध्यक्षोधर्माध्यक्षःकृताकृतः चतु
रात्माचतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः १५ भ्राजिष्णुर्भोजनंभोक्तासहिष्णु
र्जगदादिजः अनघोविजयोजेताविश्वयोनिःपुनर्वसुः १६ उपेंद्रो ३
वामनःप्रांशुरमोघःशुचिरूर्जितः अतींद्रःसंग्रहःसर्गोधृतात्मा
नियमोयमः १७ वेद्योवैद्यःसदायोगीवीरहामाधवोमधुः अतींद्रि

जगदादौउत्पद्यतेस्वयमितिजगदादिजः ४५ नविद्यतेअघंअस्येतिअनघः ४६ विजयतेज्ञानवैराग्यादिभिर्गुणैर्विश्वमितिविजयः ४७ यतोअतिशयतेसर्वभूतानिस्वभावतोअतोजेता ४८ विश्वस्यासौयोनिश्चेतिविश्वयोनिः ४९ पुनःपुनर्वसतिशरीरेषुक्षेत्रज्ञरूपेणेतिपुनर्वसुः ५० इंद्रंउपगतोअनुजत्वेनेतिउपेंद्रः ५१ बलिंवामनरूपेणयाचितवानितिवामनः ५२ सएवजगत्त्रयंक्रममाणःप्रांशुरभवदितिप्रांशुः ५३ अमोघंचेष्टितंयस्येत्यमोघः ५४ स्मर्तॄणांपावनत्वाच्छुचिः ५५ बलप्रकाशशालित्वादूर्जितः ५६ अतीत्यइंद्रंस्थितोज्ञानैश्वर्यादिभिःइत्यतींद्रः ५७ सर्वेषांप्रतिसंग्रहःसंग्रहः ५८ सर्गहेतुत्वात्सर्गः ५९ एकरूपेणजन्मादिरहितंतयाधृतात्मा ६० [illegible] अधिकारेषुप्रजानियमतीतिनियमः ६१ अंतर्यच्छतीतियमः ६२ निःश्रेयसार्थिभिर्वेदितव्योवेद्यः ६३ सर्वविद्यानांवेदित्वाद्वैद्यः ६४ सदाविभूतत्वात्सदायोगी ६५ धर्मत्राणायअसुरान्वीर्यवतोहंतीतिवीरहा ६६ मायाःविद्यायाःधवःइतिमाधवः ६७ यथामधुरंप्रीतिंउत्पादयत्ययमतोमधुः ६८ शब्दादिभ्योअतींद्रियः ६९ ॥

मायावीनामपिमायाकार्यत्वात्महामायः ७० अजगदुत्पत्तिस्थितिप्रलयकरणेउद्युक्तत्वान्महोत्साहः ७१ बलीनामपिबलवत्वान्महाबलः ७२ बुद्धिमतामपिबुद्धिमत्वान्महाबुद्धिः ७३ अविद्याख्यंप्रकृष्टंवीर्यमस्येतिमहावीर्यः ७४ महतीशक्तिःसामर्थ्यमस्येतिमहाशक्तिः ७५ महतीद्युतिर्बाह्याभ्यंतराअस्येतिमहाद्युतिः ७६ अनिर्देश्यंवपुर्यस्येत्यनिर्देश्यवपुः ७७ ऐश्वर्यलक्षणासमग्राश्रीर्यस्यासःश्रीमान् ७८ सर्वैःप्राणिभिः अमेयाबुध्यादिभिरमेयात्मा ७९ महांतंअद्रिंगोवर्द्धनंधृतवानितिमहाद्रिधृक् ८० महान्इष्वासोधनुरूपोयस्यसमहेष्वासः ८१ एकार्णवेमग्नांमहीबिभर्तीतिमहीभर्ता ८२ यस्यवक्षसिअनपायिनीश्रीःसःश्रीनिवासः ८३ साधूनांसाधनप्राप्तिहेतुःसतांगतिः ८४ सुरान्आनंदयतीतिसुरानंदः ८५ गोभिर्वाणीभिर्विंदतीतिगोविंदः ८६ वेदांपतिर्गोविदांपतिः ८७ नेनस्थि
अनिरुद्धः ८५

योमहामायोमहोत्साहोमहाबलः १८ महाबुद्धिर्महावीर्योमहाश
क्तिर्महाद्युतिः अनिर्देश्यवपुःश्रीमानमेयात्मामहाद्रिधृक् १९
महेष्वासोमहीभर्ताश्रीनिवासःसतांगतिः अनिरुद्धःसुरानंदो
गोविंदोगोविदांपतिः २० मरीचिर्दमनोहंसःसुपर्णोभुजगोत्त
नाभ मः हिरण्यगर्भःसुतपाःपद्मनाभःप्रजापतिः २१ अमृत्युःस

तामपितेजस्वित्वान्मरीचिः ८८ प्रजाःदमयितुंशीलमस्यवैवस्वतादिरूपेणेतिदमनः ८९ अहंसः इतितादात्म्यभाविनःसंसारदोषंहंतीतिहंसः ९० शोभनपतनत्वात्सुपर्णः ९१ भुजगानांउत्तमोभुजगोत्तमः ९२ हिरण्मयंब्रह्माण्डंगर्भमस्येति हिरण्यगर्भः ९३ नरनारायणरूपेणशोभनंतपश्चरतीतिसुतपाः ९४ पद्मंविश्वसुवर्णंनाभावस्येतिपद्मनाभः ९५ प्रजानांपतिःप्रजापतिः ९६ नविद्यतेमृत्युरस्येत्यमृत्युः ९७

मैत्रे

प्राणिनां कृताकृतं सर्वं पश्यति स्वबोधेनेति सर्वदृक् ९८ हिनस्तीति सिंहः ९९ कर्मफलैः पुरुषान्संधत्ते इति संधाता १०० फलभोक्तासन्नेवेति संधिमान् २ कं सदेकरूपत्वात्स्थिरः ३ अजति गच्छतीति वा अजः ४ न मर्षितुं दानवादिभिर्न शक्यत इति दुर्मर्षणः ५ श्रुतिस्मृत्यादिभिः सर्वेषां अनुशिष्टिं करोतीति शास्ता ६ विशेषेण श्रुतो येन सत्यज्ञानादिलक्षणः विश्रुतात्मा ७ सुरारीणां निहंतृत्वात् सुरारिहा ८ सम स्तविद्यानां उपदेष्टृत्वाद्गुरुः ९ विरंच्यादीनामपि ब्रह्मविद्याप्रदायकत्वाद्गुरुतमः १० धाम ज्योतिः परं धामेत्यर्थः ११ सत्यवदनलक्षणधर्मरूपत्वात्सत्यः १२ अवितथं सत्यपराक्रमो यस्य सः सत्यपराक्रमः १३ निमीलितनेत्रो योगनिद्रां यातो निमिषः १४

र्दृक्सिंहः संधाता संधिमान्स्थिरः अजो दुर्मर्षणः शास्ता विश्रुतात्मा सुरारिहा २२ गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः २३ अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः सहस्रमूर्धा विश्वात्मा सहस्राक्षः ४

सहस्रपात् २४ आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः अ

प्रबुद्धतया अनिमिषः १५ वैजयन्त्याख्यां स्रजं नित्यं बिभर्तीति स्रग्वी १६ सर्वार्थविषया धीरस्येति उदारधीः वाचस्पतये १७ अग्रं उत्कृष्टं पदं नयतीति मुमुक्षूनिति अग्रणी १८ भूतग्रामस्य नियंतृत्वाद्ग्रामणीः १९ कीतिरस्येति श्रीमान् २० प्रमाणानुग्राहकोतर्कोन्यायः २१ जगद्यंत्रनिर्वाहको नेता २२ श्वसनरूपेण भूतानि चेष्टयतीति समीरणः २३ सहस्राणि मूर्धानो अस्येति सहस्रमूर्धा २४ विश्वस्य आत्मा इति विश्वात्मा २५ सहस्राणि अक्षीणि अस्येति सहस्राक्षः २६ सहस्राणि पादाः अस्येति सहस्रपात् २७ संसारचक्रे आवर्तयितुं शीलं अस्येति आवर्तनः २८ संसारबंधान्निवृत्तः आत्मा अस्येति निवृत्तात्मा २९ अविद्यया आवृतत्वात् संवृतः ३० संप्रमर्दयतीति रुद्रकालादिविभूतिभिरिति संप्रमर्दनः ३१ " " "

अहःसंवर्तको अर्कः प्रवर्तनादहः ३२ सूर्योऽहःसंवर्तकः ३३ वहनाद्वह्निः ३४ अनादितः अनिलः ३५ शेषरूपेण धरणीं धत्त इति धरणीधरः ३६ शोभनः प्रसादोऽस्य आकारवतामपि मोक्षं प्रयच्छतीति सुप्रसादः ३७ रजस्तमोविहीनमंतःकरणमस्येति प्रसन्नात्मा ३८ विश्वं धृष्णातीति विश्वधृक् ३९ विश्वं भुंक्ते इति विश्वभुक् ४० हिरण्यगर्भादिविविधं भवतीति विभुः ४१ सत्करोतीति सत्कर्ता ४२ सत्क्रियत इति सत्कृतः ४३ न्यायवृत्तितया साधुः ४४ जनान्संहारकाले नयतीति जह्नुः ४५ नरआत्मा ततो जातान्याकाशादीनि कार्याणि इति नारायणः ४६ नयतीति नरः ४७ यस्मिन्संख्या नामरूपादीन्न विद्यते सो असंख्येयः ४८

हःसंवर्तको वह्निरनिलो धरणीधरः २५ सुप्रसादः प्रसन्नात्मा विश्वधृग्विश्वभुग्विभुः सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः २६ असंख्येयोऽप्रमेयात्मा विशिष्टः शिष्टकृच्छुचिः सिद्धार्थः सिद्धसंकल्पः सिद्धिदः सिद्धिसाधनः २७ वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः २८

अप्रमेयः आत्मस्वरूपमस्येति अप्रमेयात्मा ४९ अतिशेते सर्वमतो विशिष्टः ५० शिष्टशासनं करोतीति शिष्टकृत् ५१ निरंजनाच्छुचिः ५२ सिद्धोऽर्थमानत्वात् अर्थोऽस्येति सिद्धार्थः ५३ सिद्धो निष्पन्नो संकल्पो अस्येति सिद्धसंकल्पः ५४ सिद्धाः फलानि कर्तृभ्यो ददातीति सिद्धिदः ५५ सिद्धेः साधकत्वादिति सिद्धिसाधनः ५६ वृषो धर्मस्तदेव वाही वृषवाहः सास्यास्तीति वृषाही ५७ प्रत्यक्प्रकाशकेभ्यः कामानीति वृषभः ५८ विक्रमणादिति विष्णुः ५९ वृषरूपाणि सोमपानपर्वाण्याकृ अतो वृषपर्वा ६० प्रजा वृषतीवोदरं अस्येति वृषोदरः ६१ वर्धयतीति वर्धनः ६२ प्रपंचरूपेण वर्धयतीति वर्धमानः ६३ इत्थं वर्धमानोऽपि पृथगेवावतिष्ठते इति विविक्तः ६४ श्रुतयः सागररूपेण निधीयत इति श्रुतिसागरः ६५" " " "

शोभना भुजा अस्येति सुभुजः ६६ पृथिव्यादीनपि धारयितुं शक्य इति दुर्द्धरः ६७ यतो निःसृता ब्रह्ममयी वाक् इति वाग्मी ६८ महांश्चासाविं
द्रश्चेति महेंद्रः ६९ वसुर्द्धनं ददातीति वसुदः ७० आच्छादयत्यात्मनः स्वरूपं मायया इति वसुः ७१ एकं रूपमस्य न विद्यत इति नै
करूपः ७२ बृहद् वराहरूपमस्येति बृहद्रूपः ७३ शिपिः पशुः तेषु प्रति तिष्ठते यज्ञरूपेण इति शिपिविष्टः ७४ सर्वेषां प्र
काशनशीलत्वात्प्रकाशनः ७५ ओजः प्राणबलं तेजः शौर्यादयो गुणाः द्युतिं दीप्तिं धारयतीति ओजस्तेजोद्युतिधरः ७६ प्रका
शः आत्मा अस्येति प्रकाशात्मा ७७ प्रकाशादिभिः विश्वं प्रतापयतीति प्रतापनः ७८ धर्मज्ञानवैराग्यादिभिरुपेत इति ऋद्धः ७९

सुभुजो दुर्द्धरो वाग्मी महेंद्रो वसुदो वसुः नैकरूपो बृहद्रूपः शिपिवि
ष्टः प्रकाशनः २९ ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः
ऋद्धः स्पष्टाक्षरो मंत्रश्चंद्रांशुर्भास्करद्युतिः ३० अमृतांशूद्भ
वो भानुः शशबिंदुः सुरेश्वरः औषधं जगतः सेतुः सत्यधर्मपरा ५
क्रमः ३१ भूतभव्यभवन्नाथः पवनः पावनोऽनलः कामहा का

स्पष्टमुदात्तोंकाररूपमक्षरमस्येति स्पष्टाक्षरः ८० मंत्रवाच्यत्वान्मंत्रः ८१ चंद्रांशुरिवाह्लादकत्वाच्चंद्रांशुः ८२ भास्करद्युति
साधर्म्याद्भास्करद्युतिः ८३ अमृतांशूद्भवः समुद्रस्तस्येवोद्भवो यस्य चंद्रांशूद्भवः ८४ भातीति भानुः ८५ शशबिंदुश्चंद्रस्तद्वत्प्रजाः
पुष्णातीति शशबिंदुः ८६ सुराणां ईश्वरः सुरेश्वरः ८७ संसाररोगभेषजत्वादौषधं ८८ जगतामुत्तारणहेतुत्वाज्जगतः सेतुः
८९ सत्यसत्यलक्षणः धर्मज्ञानवैराग्यादिरस्य स सत्यधर्मपराक्रमः ९० भूतभव्यभवंतो भूतग्रामास्तैर्याच्यत इति भूतभव्य
भवन्नाथः ९१ पवत इति पवनः ९२ पावयतीति पावनः ९३ अगंधरसत्यनलः ९४ कामान्हंति मुमुक्षूणामिति कामहा ९५

कामान्करोतीति कामकृत् ९६ अनिरूप्यतमः कांतः ९७ काम्यते मोक्षकांक्षिभिरिति कामः ९८ भक्तानां प्रकर्षेण कामान् ददातीति कामप्रदः
९९ प्रकर्षेण भवतीति प्रभुः ३०० युगादिकालभेदस्य कर्तृत्वाद्युगादिकृत् १ युगानि आवर्तयतीति युगात्मना इति युगावर्त्तः एका
माया न विद्यते बह्व्यो माया वर्तंतीति नैकमायः २ कल्पांते सर्वभूतग्रसनान्महदशनमस्येति महाशनः ३ बुद्धीन्द्रियागम्य अदृश्यः ४ व्य
क्तं रूपमस्येति व्यक्तरूपः ५ सहस्राणि जयतीति सहस्रजित् ६ अचिंत्यशक्तिमत्त्वात् जयतीति अनंतजित् ७ परमानंदत्वेन प्रियः
इष्टः ८ यज्ञेन पूजित इति विशिष्टः ९ शिष्टा इष्टा अस्येति शिष्टेष्टः १० शिखंडी गोपवेषधरः ११ मायाविशिष्ट नहुषः १२

मकृत्कांतः कामः कामप्रदः प्रभुः ३२ युगादिकृद्युगावर्त्तो नैकमायो
महाशनः अदृश्यो व्यक्तरूपश्च सहस्रजिदनंतजित् ३३ इष्टो वि
शिष्टः शिष्टेष्टः शिखंडी नहुषो वृषः क्रोधहा क्रोधकृत्कर्त्ता विश्वबा
हुर्महीधरः ३४ अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः अ
पां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ३५ स्कंदः स्कंदधरो धुर्यो

कामानां वर्षणेन वृषः १३ साधूनां क्रोधं हंतीति क्रोधहा १४ असाधुषु क्रोधं करोतीति क्रोधकृत् १५ क्रियत इति कर्म कर्त्ता १६
विश्वबाहवोऽस्येति विश्वबाहुः १७ महीं भूमिं धरतीति महीधरः १८ षड्भावरहितत्वादच्युतः १९ जगदुत्पत्त्यादिकर्मभिः
ख्यातः प्रथितः २० सूत्रात्मना प्राणयतीति प्राणः २१ सुरासुराणां प्राणं ददातीति प्राणदः २२ अदित्यां कश्यपाद्वास
वस्य अनुजो जातः इति वासवानुजः २३ आपो यत्र निधीयंते इति अपांनिधिः २४ उपादानकारणत्वेन ब्रह्मैव अधिष्ठानं
२५ कर्मानुरूपफलं प्रयच्छन् अप्रमत्तः २६ स्वे महिम्नि प्रतिष्ठितः २७ स्कंदति अमृतरूपेण स्रवतीति स्कंदः २८ स्कंदं धर्म
पथं धारयतीति स्कंदधरः २९ धुरं वहतीति समस्तभूतजन्मादिधुर्यः ३० " " "

अभिमतं ददातीति वरदः ३१ मरुतः वाहयतीति वायुवाहनः ३२ वसति सर्वमिति वासुः दीव्यतीति देवः वासुश्चासौ देवश्चे तिवासुदेवः ३३ बृहंतो भानवो यस्य सूर्यचंद्रादि बृहद्भानुः ३४ आदिकारणं स देवश्चेत्यादिदेवः ३५ सुरशत्रूणां पुरा णां दारणात्पुरंदरः ३६ षडूर्मिवर्जितो अशोकः ३७ संसारसागरात्तारयतीति तारणः ३८ गर्भजन्मजरामृत्युभ याल्लारयतीति तारः ३९ शूरो विक्रमः ४० शूरकुलोद्भवत्वात् शौरिः ४१ जनानां जंतूनामीश्वरः जनेश्वरः ४२

वरदोवायुवाहनः वासुदेवोबृहद्भानुरादिदेवःपुरंदरः ३६ अशोकस्ता
रणस्तारःशूरःशौरिर्जनेश्वरः अनुकूलःशतावर्त्तःपद्मीपद्मनिभे
क्षणः ३७ पद्मनाभोरविंदाक्षःपद्मगर्भःशरीरभृत् महर्द्धिरृद्धोवृ ६
द्धात्मामहाक्षोगरुडध्वजः ३८ अतुलःशरभोभीमःसमयज्ञोहवि
र्हरिः सर्वलक्षणलक्षण्योलक्ष्मीवान्समितिंजयः ३९ विक्षरोरोहि

नहि यस्मिं प्रतिकूलं स्वयमाचरतीति अनुकूलः ४३ धर्मत्राणाय शतं आवर्त्तनं अस्येति शतावर्त्तः ४४ पद्मं हस्ते विद्यते अस्य स पद्मी ४५ पद्मनिभे ईक्षणे दृशाव स्येति पद्मनिभेक्षणः ४६ पद्मः सनाभौ मध्ये कर्णिकायां स पद्मनाभः ४७ अरविंदोपमत्वादरविंदाक्षः ४८ पद्म हृदयाख्यस्य मध्ये उपविष्टत्वात् पद्मगर्भः ४९ प्राण रूपेण शरीरिणां शरीराणि धारयन् इति शरीरभृत् ५० महती ऋद्धिर्विभूतिर्यस्य अस्तीति महर्द्धिः ५१ प्रपंचरूपेण वर्द्धमानत्वादृद्धः ५२ वृद्धः पुरातनः आत्मा अस्येति वृद्धात्मा ५३ महती अक्षीणि अस्येति महाक्षः ५४ गरुडः ध्वजो अस्येति गरुडध्वजः ५५ अतुलोनास्ति उपमानरहितः अतुलः ५६ शरा शरीराणि तत्प्रत्यगात्मत याभातीति शरीरभृत् ५७ बिभेत्यस्मादिति भीमः ५८ समयं षट्कालान् समयान् जानातीति समयज्ञः ५९ हविर्भागं यज्ञेषु हरतीति हविर्हरिः ६० सर्वलक्षणैः प्रमाणैर्लक्षणं दर्शनं जायते इति सर्वलक्षणलक्षण्यः ६१

मुमुक्षुभिर्लक्ष्यः सर्वप्राप्यत्वात् समार्गः ६६ उपादाननिमित्तकारणं हेतुः ६७ यशोदया दाम्ना उदरे बद्ध इति दामोदरः ६८ सहते इति सहः ६९ महीं गिरिरूपेण धरतीति महीधरः ७० प्रकृष्टानि भागानि यानि भुंक्त इति महाभागः ७१ वेगेन बलवत्वात् वेगवान् ७२ संहारकाले विश्वं अश्नातीति अमिताशनः ७३ प्रपंचोत्पत्त्युपादानत्वादुद्भवः ७४ संहारकाले प्रकृतिं पुरुषं च प्रविश्य क्षो भयामास इति क्षोभणः ७५ दीव्यते सर्वभूतेषु आत्मतया इति देवः ७६ श्रीर्विभूतिः यस्योदरांतरे जगद्रूपा स्थिता सः श्रीगर्भः ७७ परमश्चासौ ईशनशीलश्चेति परमेश्वरः ७८ जगदुत्पत्तौ सर्वसाधकतमं करणं ७९ उपादाननिमित्तकारणं कारणं ८० स्वतंत्रः कर्त्ता ८१ विचित्रं भुवनं कृतवानिति विकर्त्ता ८२ तस्य स्वरूपं ज्ञातुं न शक्यत इति गहनः ८३ ब्रवगुहते संवृणोति मायया इ ति गुहः ८४

तोमार्गोहेतुर्दामोदरःसहः महीधरोमहाभागोवेगवानमिताशनः
४० उद्भवःक्षोभणोदेवःश्रीगर्भःपरमेश्वरः करणंकारणंकर्त्ताविकर्त्तागहनोगुहः ४१ व्यवसायोव्यवस्थानःसंस्थानःस्थानदो
ध्रुवः परमर्द्धिःपरस्पष्टस्तुष्टःपुष्टःशुभेक्षणः ४२ रामोविरा
मोविरजोमार्गोनेयोनयोनयः वीरःशक्तिमतांश्रेष्ठोधर्मोध

तस्मिन्मात्रस्वरूपत्वाद्व्यवसायः ८५ यस्मिन्व्यवस्थितिः सव्यवस्थानः ८६ यत्र भूतानां स्थितिः समीचीनं स्थानमिति संस्थानः ८७ ध्रुवादीनां ददातीति स्थानदः ८८ अविनाशित्वात् ध्रुवः ८९ ऋद्धिर्विभूतिरस्येति परमर्द्धिः ९० अनन्याधीनत्वात् संविदात्मतया परमस्पष्टः ९१ परमानंदैकरूपत्वात्तुष्टः ९२ संपूर्णं कृत्वा पुष्टः ९३ शुभं ईक्षणं दर्शनं यस्येति शुभेक्षणः ९४ नित्यानंदस्वरूपे इति रामः ९५ विरामो वृत्त्याने प्राणिनामिति विरामः ९६ विगतं रजो यस्य स विरजः ९७ यं विदित्वा मुमुक्षवः अमृतत्वाय स एव पंथा मार्गः ९८ सम्यक्ज्ञानेन जीवः परमतया नीयत इति नेयः ९९ नयतीति नयः न अस्य नेता न विद्यत इति अनयः १०० विक्रमशालित्वाद्वीरः १ शक्तिमतां विरिंच्यादीनां अतिशक्तिमत्वाच्छक्तिमतां श्रेष्ठः २ सर्वभूतानि धारणाद्धर्मः ३

श्रुत्यादिलक्षणश्च आज्ञाभूतास्तएव धर्माः विदांउत्तमः विदुत्तिधर्मविदुत्तमः ४ विविधाक्रांतगतिः प्रतिष्ठतिइतिविक्रांतात्विकुंठ
प्रापणं करोति इति वैकुंठः ५ पुरिशयात्पुरुषः ६ प्राणितिक्षेत्रज्ञरूपः प्राणः ७ प्राणिनां प्राणान्प्रलयादिषु खंडयतीति
प्राणदः ८ प्रणम्यतेइति प्रणवः ९ प्रपंचरूपेण विस्तृतत्वात्पृथुः १० हिरण्यगर्भः भूतसंततिकारणं तस्यगर्भ इति हिरण्यगर्भः
११ शत्रून्घ्नंतीति शत्रुघ्नः १२ कारणत्वेन सर्वकार्याणां व्याप्तत्वाद्व्याप्तः १३ वातिगंधंकरोतीति वायुः १४ अधोनक्षी
यतेतस्मादधोक्षजः १५ कालात्मना ऋतु शब्देन लक्ष्यत इति ऋतुः १६ सुखेनदृश्यतेनकैरितिसुदर्शनः १७ कलय
तीति कालः १८ परमे प्रकृष्टे स्वेमहिम्नि हृदयाकाशे स्थातुं शीलमस्येति परमेष्ठी १९ शरणार्थिभिः परितो गृह्यतेतिपरिग्रहः २०

र्मविदुत्तमः ४३ वैकुंठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः हिर
ण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः ४४ ऋतुः सुदर्शनः कालः
परमेष्ठी परिग्रहः उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः ४५ ७
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययं अर्थोनर्थो महाकोशो
महाभोगो महाधनः ४६ अनिर्विण्णः स्थविष्ठोभूर्धर्मयू

सूर्यादीनामपि भयहेतुत्वादुग्रः २१ संविशंतिभूतानियस्मिन्निति संवत्सरः २२ सर्वकार्याणि क्षिप्रं करोतीति दक्षः २३ संसारसाग
रे क्लिश्यतेभ्यः विश्रामं मोक्षं करोतीति विश्रामः २४ विश्वस्माद्दक्षिणः विश्वदक्षिणः २५ विस्तीर्यंते समस्तानियस्मिन्निति
विस्तारः २६ स्थितिशीलः स्थावरः स्थितिशीलानि पृथ्व्यादीनि तस्मिन्तिष्ठंतीति स्थाणुः स्थावरश्चासौ स्थाणुश्च स्थाव
रस्थाणुः २७ संविदात्मना प्रमाणं २८ अन्यथाभावव्यतिरेकेण कारणं कारणं बीजमव्ययं २९ सुखरूपत्वादर्थ्यतइ
ति अर्थः ३० न विद्यते प्रयोजनं प्राप्तकामत्वादनर्थः ३१ महांतः कोशा अन्नाद्याः अस्येति महाकोशः ३२ महाभोगः सुख
रूपो भोगोस्येति महाभोगः ३३ महत्भोगस्थानलक्षणं धनसाधनं अस्येति महाधनः ३४ निर्वेदो अस्य न विद्यत इत्य
निर्विण्णः ३५ स्थूलरूपेण स्थितः स्थविष्ठः ३६ अजन्मात्स्वयंभूः ३७ यूपे धर्मरूपाः पशवः बध्यंते इति धर्मयूपः ३८

यस्मिन्नर्पिताः मखाः यज्ञाः निर्वाणलक्षणं फलं मखाः यांतिस महामखः ३९ शिशुमारस्य हृदयेन्ज्योतिश्चक्रे कस्य नेमिवद्वर्तमान
त्वाद्वर्तयन्नक्षत्रनेमिः ४० चंद्ररूपेण नक्षत्राणां नक्षत्री ४१ क्षमत इति क्षमः ४२ सर्वविकारेषु क्षपितेषु स्वात्मनावस्थितइति
क्षामः ४३ सृष्ट्याद्यर्थं सम्यगीहत इति समीहनः ४४ सर्वयज्ञस्वरूपत्वाद्यज्ञः ४५ यष्टव्यो यथ्येन इज्यः फलदातृत्वात् इज्यः
४६ सर्वासुदेवतासु मोक्षफलदातृत्वान्महेज्यः ४७ यूपसहितो यज्ञः क्रतुः ४८ चोदनालक्षणः सत्रं ४९ सतां मुमुक्षू
णां नान्या गतिरिति सतांगतिः ५० प्राणिनां कृताकृतं पश्यतीति सर्वदर्शी ५१ स्वभावेन विमुक्तः आत्मा अस्येति
विमुक्तात्मा ५२ सर्वश्चासौ ज्ञश्चेति सर्वज्ञः ५३ ज्ञानमुत्तमं ब्रह्म ५४ शोभनं व्रतमस्येति सुव्रतः ५५ शोभनं मुखम
स्येति सुमुखः ५६ स्थूलकारणत्वाभावात्सूक्ष्मः ५७ शोभनो घोषो वेदात्मकोस्य सुघोषः ५८ सद्वृत्तानां सु
खं ददातीति सुखदः ५९ प्रत्युपकारनिरपेक्षतयोपकारित्वात्सुहृत् ६० मनो हरतीति मनोहरः ६१ जितः क्रो

पो महामखः नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः ४७ य
ज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः सर्वदर्शी विमुक्तात्मा
सर्वज्ञो ज्ञानमुत्तमं ४८ सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुख
दः सुहृत् मनोहरो जितक्रोधो वीरबाहुर्विदारणः ४९ स्वा
पनः स्ववशो व्यापी नैकात्मा नैककर्मकृत् वत्सरो वत्सलो वत्सी र

धोयेनसः जितक्रोधः ६२ विक्रमशालिबाहुरस्येति वीरबाहुः ६३ अधार्मिकान्विदारयतीति विदारणः ६४
स्वापयन्नात्मसंबोधविधुरान्मायया कुर्वन्निति स्वापनः ६५ स्वतंत्रः स्ववशः ६६ आकाशवत्सर्वगतत्वाद्व्या
पी ६७ जगदुत्पत्त्यादिविभिन्नभूतिभिरनेकधातिष्ठन्नैकात्मा ६८ जगदुत्पत्तिप्रभृतिकर्माणि करोतीत्यनेककर्म
कृत् ६९ वसत्यखिलमिति वत्सरः ७० भक्तस्नेहत्वाद्वत्सलः ७१ वत्सानां पालकत्वाद्वत्सी ७२ ॥

१४

रत्नानि गर्भे धारयतीति रत्नगर्भः ७२ धनानां ईश्वरो धनेश्वरः धर्मं गोपयतीति धर्मगुप् ७५ धर्मं करोतीति धर्मकृत् ७६ धर्मान् धारयिता धर्मी ७७ अविनश्वरं परं ब्रह्मेति सत् ७८ अपरं ब्रह्म असत् ७९ सर्वाणि भूतानि क्षरं
८० ७९ कूटस्थः कारणं अक्षरं ८१ आत्मनि कर्तृत्वादि ज्ञानं कल्पितमिति न जानातीति अविज्ञाता ८२
आदित्यादि गतानि अंशवो अस्येति सहस्रांशुः ८३ विशेषेण सर्वभूतानां दधातीति विधाता ८४ कृतानि लक्षणानि शास्त्राणि अनेनेति कृतलक्षणः ८५ गभस्तिचक्रस्य मध्ये सूर्यात्मना स्थितो गभस्तिनेमिः ८६ सर्वप्राणिषु तिष्ठतीति सत्त्वस्थः ८७ विक्रमशालित्वात् सिंहवत् सिंहः ८८ भूतानां महत् ईश्वरः भूतमहेश्वरः ८९ आ

नगर्भो धनेश्वरः ५० धर्मगुब्धर्मकृद्धर्मी सदक्षरमसत्क्षरं अविज्ञा
ता सहस्रांशुर्विधाता कृतलक्षणः ५१ गभस्तिनेमिः सत्त्वस्थः सिं
हो भूतमहेश्वरः आदिदेवो महादेवो देवेशो देवभृद्गुरुः ५२ उ
त्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः शरीरभूतभृद्भोक्ता कपी
न्द्रो भूरिदक्षिणः ५३ सोमपोमृतपः सोमः पुरुजित्पुरुसत्तमः

देवानामीशो देवेशः ९२ ९२

दिश्यासौ देवश्च आदिदेवः ९० सर्वान् भावान् परित्यज्य आत्मज्ञानयोगैश्वर्ये महति महीयते इति महादेवः ९१
देवानामीशो देवेशः ९२ देवान् बिभर्तीति देवभृत् कः तस्यापि शासितेति देवभृद्गुरुः ९३ उत्कृष्ट इति उत्तरः ९४
गवां पालनात् गोपतिः ९५ समस्तभूतानि पालयन् गोप्ता ९६ ज्ञानेनैव गम्यत इति ज्ञानगम्यः ९७ पुरापि भवतीति पुरातनः ९८ शरीरं भक भूतानां भरणात् शरीरभूतभृत् ९९ पालको भोक्ता ५०० कपीनां वानराणां इन्द्रो राघवः कपीन्द्रः १ भूरयो यज्ञदक्षिणा अस्य विद्यन्ते इति भूरिदक्षिणः २ सोमं पिबतीति सर्वयज्ञेषु देवरूपेणेति सोमपः ३ स्वात्मना अमृतरसं पिबन् असुरैर्ह्रियमाणं रक्षित्वा देवान् पाययित्वा स्वयं पिबन् अमृतपः ४ सोमरूपेण ओषधीः पोषयन् सोमः ५ समस्तानि भूतानि जयतीति जयः ६ पुरुस्सोसत्तमः पुरुसत्तमः ७ विश्वरूपत्वार्थः

य

विनयं दण्डं दुष्टानां करोतीति विनयः ८ समस्तानि भूतानि जयतीति जयः ९ सत्यसंधा संकल्पो अस्येति सत्यसंधः १० दाशो दानं तदर्हतीति दाशार्हः ११ सात्वतं नाम तन्त्रं तत्करोतीति सात्वतांपतिः १२ प्राणान् क्षेत्रज्ञरूपेण धारयतीति जीवः १३ विनयितो साक्षात् पश्यतीति विनयिता साक्षी १४ मुक्तिं ददातीति मुकुंदः १५ अमितं विक्रमः शौर्यं अस्येति अमितविक्रमः १६ अंभांसि अस्मिन् निधीयंते इति अंभोनिधिः १७ देशकालवस्तुपरिच्छिन्न अनंतात्मा १८ जगत् एकार्णवं कृत्वा अधिशेते इति महोदधिशयः १९ अंतं करोतीति भूतानां इति अंतकः २० अजायत इति कामो अजः २१ महः पूजा तदर्हत्वात् इति महार्हः २२ स्वभावेनैव भाव्यः नित्यनिष्पन्नत्वादिति स्वाभाव्यः २३ जिताः अमित्राणि रागद्वेषादयो येनेति जि

विनयोजयः सत्यसंधो दाशार्हः सात्वतांपतिः ५४ जीवो विनयि
तासाक्षी मुकुंदोमितविक्रमः अंभोनिधिरनंतात्मा महोदधिश
योंतकः ५५ अजोमहार्हः स्वाभाव्यो जितामित्रः प्रमोदनः आ
नंदोनंदनो नंदः सत्यधर्मा त्रिविक्रमः ५६ महर्षिः कपिलाचा
र्यः कृतज्ञो मेदिनीपतिः त्रिपदस्त्रिदशाध्यक्षो महाशृंगः कृतां

तामित्रः २४ ध्यायिनो ध्यानमात्रेण प्रमोदं कुरुते इति प्रमोदनः २५ आनंदस्वरूपमस्येति आनंदः २६ नंदस्यास्तीति नंदनः २७ सर्वाभिरुपपत्तिभिः समृद्धो नंदः २८ सत्या धर्मा ज्ञानादयो अस्येति सत्यधर्मा २९ त्रयो विक्रमाः त्रिषु लोकेषु यस्य स त्रिविक्रमः ३० महर्षिः कपिलाचार्य एकं नाम शुद्धात्मतत्त्वविज्ञानं सांख्याचार्य इत्यर्थः ३१ कृतं कार्यं जगत् ज्ञः आत्मा कृतज्ञ इति कृतज्ञः ३२ मेदिन्या भूम्याः पतिः मेदिनीपतिः ३३ त्रीणि पदान्यस्येति त्रिपदः ३४ अवस्था जाग्रदादयस्तासां अध्यक्ष इति त्रिदशाध्यक्षः ३५ मत्स्यरूपी महति शृंगे बद्धा चिक्रीडे इति महाशृंगः ३६ कृतस्यांतं संहारं करोतीति कृतांतकृत् ३७

महांश्चासौवराहश्चेतिमहावराहः ३८ गोभिर्वाणीभिर्विंद्यतीतिगोविंदः ३९ शोभनासेनायस्येतिसुषेणः ४० कनकेननिर्मितंअंगदंयस्येतिकनकांगदी ४१ हृदिआकाशेनिहितइतिगुह्यः ४२ ज्ञानैश्वर्यादिभिर्गंभीरोगंभीरः ४३ दुःप्रवेशत्वाद्गहनः ४४ वाङ्मनसोगोचरत्वाद्गुप्तः ४५ मनस्तत्त्वात्मकंचक्रंबुद्धितत्त्वात्मिकांगदांजगद्रक्षार्थंधरतीतिचक्रगदाधरः ४६ विधातावेधाः ४७ स्वयमेवकारणंअंगोऽस्येतिस्वांगः ४८ नकेनापिजितइत्यजितः ४९ कृष्णःव्यासः ५० स्वरूपसामर्थ्यादप्रच्युतभावःदृढः ५१ संहारकालेयुगपत्प्रजाःसंकर्षयतीतिसंकर्षणोच्युतःसविशेषणं ५२ स्वरश्मिसंवरणात्मापेगतः ५३ वरुणस्यापत्यंवसिष्ठोवारुणः ५४ वृक्षइवअचलतयास्थितोवृक्षः ५५ हृदयेपुंडरीकेचिंतितस्वरूपेणप्रकाशतइतिपुष्कराक्षः ५६ बृहत्सृष्टिस्थित्यंतकर्माणिम

तकृत् ५७ महावराहोगोविंदःसुषेणःकनकांगदी।गुह्योगभीरोगहनोगुप्तश्चक्रगदाधरः ५८ वेधाःस्वांगोऽजितःकृष्णोदृढःसंकर्षणोऽच्युतः वरुणोवारुणोवृक्षःपुष्कराक्षोमहामनाः ५९ भगवान्भगहानंदीवनमालीहलायुधः आदित्योज्योतिरादित्यःसहिष्णुर्गतिसत्तमः ६० सुधन्वाखंडपरशुर्दारुणोद्रविणप्रदः ९

नसैवकरोतीतिमहामनाः ५७ भगोऽस्यास्तीतिभगवान् ५८ ऐश्वर्यादिकंसंहारकालेहंतीतिभगहा ५९ सुखस्वरूपत्वादानंदी ६० भूततन्मात्रमालांवहन्इतिवनमाली ६१ हलंआयुधंअस्येतिहलायुधः ६२ आदित्यांवामनेनत्यर्थः ६३ सावित्रेमंडलेस्थितोज्योतिःआदित्यः ६४ द्वंद्वानिशीतोष्णादीनिसहतइतिसहिष्णुः ६५ गतिश्चासौसत्तमश्चेतिगतिसत्तमः ६६ शोभनंइंद्रियादिमयंशार्ङ्गधनुर्यस्यससुधन्वा ६७ शत्रूणांखंडनात्खंडपरशुः ६८ सन्मार्गविरोधिविदारणाद्दारुणः ६९ द्रविणंवांछितंभक्तेभ्यःप्रददातीतिद्रविणप्रदः ७० दिवस्पृ

दिवस्पृशत्वाद्दिवस्पृक् ७१ सर्वंपश्यतीतिसर्वदृक्सर्वाकारज्ञानमित्यर्थः ७२ ऋग्वेदादिविभागेनचतुर्धाविस्तारितवेदाद्व्यासः ७३ वाचोविद्यायाःपतिःवाचस्पतिः जनन्यानजायतइतिअयोनिजः वाचस्पतिरयोनिजश्चेत्यर्थः ७४ तिसृभिःसामभिःस्तूयतइतित्रिसामा ७५ सामगायतीतिसामगः ७६ सामवेदःसाम ७७ सर्वदुःखोपशमलक्षणंपरानंदरूपंनिर्वाणं ७८ संसाररोगस्यऔषधंभेषजं ७९ संसाररोगस्यऔषधंभिषक्विद्योपदेशःभिषक् ८० मोक्षार्थंचतुर्थंकृतवान्इतिसंन्यासकृत् ८१ ज्ञानसाधनेप्राधान्येनशमयतीतिशमः ८२ विषयेषुसुखेष्वसंगतयाशांतः ८३ प्रलयकालेतत्रैवतिष्ठंतिभूतानिइतिनिष्ठा ८४ समस्ताविद्यानिवृत्तिःशांतिः साब्रह्मैव ८५ परंउत्कृष्टंस्थानंअयनंपुनरावृत्तिशंकारहितंइतिपरायणं ८६ सुंदरीतनुंधारयन्शुभांगः ८७ रागद्वेषादिरहितांशांतिंददातीतिशांतिदः

दिवस्पृक्सर्वदृग्व्यासोवाचस्पतिरयोनिजः ६१ त्रिसामासामगःसामनिर्वाणंभेषजंभिषक् संन्यासकृच्छमःशांतोनिष्ठाशांतिपरायणः ६२ शुभांगःशांतिदःस्रष्टाकुमुदःकुवलेशयः गोहितोगोपतिर्गोप्तावृषभाक्षोवृषःप्रियः ६३ अनिवर्तीनिवृत्तात्मासंक्षेप्ताक्षेमकृच्छिवः श्रीवत्सवक्षाःश्रीवासःश्रीपतिःश्रीमतांवरः

८८ सर्गादौसर्वभूतानिससर्जइतिस्रष्टा ८९ कौमेदिन्यांमोदतेइतिकुमुदः ९० कुवलंतोयंतस्मिन्शेतेइतिकुवलेशयः ९१ गोभूमेर्वाराहावतरणेछयाशरीरआदरणंकुर्वन्इतिगोहितः ९२ गोभूम्यादेःपतिःगोपतिः ९३ रक्षकोजगतइतिगोप्ता ९४ वृषभोधर्मदृष्टिरस्येतिवृषभाक्षः ९५ वृषोधर्मोप्रियोयस्येतिवृषःप्रियः ९६ देवासुरसंग्रामेअनिवृत्तइतिअनिवर्तितः ९७ स्वभावतोविषयेभ्योनिवृत्तःआत्माअस्येतिनिवृत्तात्मा ९८ संहारकालेविस्तृतंजगत्सूक्ष्मरूपेणसंक्षिपन्संक्षेप्ता ९९ उपात्तस्यक्षेमंकरोतीतिक्षेमकृत् १०० नामस्मरणमात्रेणपावयन्सशिवः श्रीवत्सलक्षणंचिह्नंअस्यवक्षसिश्रीवत्सवक्षाः १ अस्यवक्षसिअनपायिनीश्रीर्वसतीतिश्रीनिवासः २ अमृतमथनेसर्वान्देवान्विहायश्रीरेववरयामासेतिश्रीपतिः ३ विरिंच्यादीनांश्रीमतांतेषांप्रधानइतिश्रीमतांवरः ४

पतांनंद विश्लेनंदिः ३५

श्रियंभक्तानांददातिइतिश्रीदः ५ श्रियाईशःश्रीशः ६ श्रीमसुनित्यंवसतिइतिश्रीनिवासः ७ श्रियोनिधीयतेइतिश्रीनिधिः ८ कर्मानुरू
पेणश्रियःसर्वभूतानीविभावयतीतिश्रीविभावनः ९ सर्वभूतानांजननीश्रियंवक्षसावहन्इतिश्रीधरः १० स्मरतांश्रियंभक्तानांकरोती
तिश्रीकरः ११ श्रेनपापित्तिसुखवाप्तिलक्षतांश्रेयः १२ श्रेयास्यसंतीतिश्रीमान् १३ त्रयाणांलोकानांआश्रयत्वाल्लोकत्रयाश्रयः १४
शोभनेपुंडरीकाभेअक्षीणिअस्यैतिस्वक्षः १५ शोभनान्यंगानिअस्यैतिस्वंगः १६ एकेवउपाधिभेदाच्छतधाभिद्यतइतिशता
नंदः १७ अविनाशीकीर्तिरस्यैतिसत्कीर्तिः १८ ज्योतिर्गणानांईश्वरोज्योतिर्गणेश्वरः १९ विजितःआत्मायेनसःविजितात्मा २०
नकेनापिविधेयमात्मस्वरूपंअस्यैतिविधेयात्मा २१ अविनाशीकीर्तिरस्यैतिसत्कीर्तिः २२ कोपिसंशयोनास्तीतिछिन्नसंशयः

६४ श्रीदः श्रीशः श्रीनिवासः श्रीनिधिः श्रीविभावनः श्रीधरः
श्रीकरः श्रेयः श्रीमान्लोकत्रयाश्रयः ६५ स्वक्षः स्वंगः शतानं
दोनंदिर्ज्योतिर्गणेश्वरः विजितात्माविधेयात्मासत्कीर्तिःछिन
संशयः ६६ उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतःस्थिरः भूशयो १०
भूषणोभूतिर्विशोकःशोकनाशनः ६७ अर्चिष्मानर्चितःकुंभो

२३ सर्वभूतेषुसमुद्रिक्तत्वादुदीर्णः २४ सर्वस्वचेतन्येनपश्यतीतिसर्वतश्चक्षुः २५ नविद्यतेअस्यईशइतिअनीशः २६ समस्तभूतीनांवि
पिक्रियांकाचिदुपेतीतिशाश्वतस्थिरः २७ भूमौशेतेइतिभूशयः २८ स्वेच्छयावतारेभूमिंभूषयन्भूषणः २९ समस्तभूतीनांकारणत्वा
द्भूतिः ३० विगतःशोकोपरानंदत्वाद्विशोकः ३१ स्मरणमात्रेणभक्तानांशोकंनाशयतीतिशोकनाशनः ३२ अर्चिंषितोर्चंद्रसूर्यादयःस
एवमुख्योअर्चिष्मान् ३३ विरंच्यादिरर्चितइतिअर्चितः ३४ कुंभवत्सर्वंप्रलीनंइतिकुंभः ३५

णुणत्रयातीततयाविशुद्धात्मा ३६ स्मृतिमात्रेणपापानांक्षपणाद्विशोधनः ३७ चतुर्व्यूहेष्वनिरुद्धः ३८ प्रतिपक्षोनविद्यतइतिअप्रति
रथः ३९ प्रकृष्टंद्रविणमस्यैतिप्रद्युम्नः ४० अपरिमितंविक्रमोयस्यसअमितविक्रमः ४१ कालनेमिमसुरंनघानेतिकालनेमिहा
४२ शूरकुलोद्भवत्वाच्छौरिः ४३ वीरःशूरः ४४ वीरजनानांवासवादीनांशौर्यातिशयेनइष्टेइतिशूरजनेश्वरः ४५ त्रया
णांलोकानांअंतर्यामितयाआत्माइतित्रिलोकात्मा ४६ त्रयोलोकास्तदाज्ञयात्रिभुवनर्मसुवर्ततइतित्रिलोकेशः ४७
अर्कईश्वरअक्षुब्रह्मविष्णुशिवाख्याःशक्तयःकेशाःतद्वत्याःकेशवः ४८ केशिनंदैत्यंहतवानितिकेशिहा ४९ सहेतु
कसं हरणाद्धरिः ५० काम्यतीतिकामपुरुषार्थचतुष्टयंकामश्चासौदेवश्चकामदेवः ५१ कामिनांकामान्पालयतीतिकामपा

विशुद्धात्माविशोधनः अनिरुद्धोप्रतिरथःप्रद्युम्नोमितविक्रमः ६८
कालनेमिनिहाशौरिर्वीरःशूरजनेश्वरः त्रिलोकात्मात्रिलोकेशः
केशवःकेशिहाहरिः ६९ कामदेवःकामपालःकामीकांतःकृ
तागमः अनिर्देश्यवपुर्विष्णुर्वीरोनंतोधनंजयः ७० ब्रह्मण्यो
ब्रह्मकृद्ब्रह्माब्रह्मब्रह्मविवर्द्धनः ब्रह्मविद्ब्राह्मणोब्रह्मीब्रह्म

लः ५२ कामोअस्यास्तीतिकामी ५३ अतिरूपतमंदेहंवहन्कांतः ५४ श्रुतिस्मृत्यादिलक्षणोयेनसृष्टतागमः ५५ इदंई
दृशंचेतिनिर्देष्टुंनशक्यतेअरूपत्वादस्यैति अनिर्देश्यवपुः ५६ रोदसीव्याप्यस्थितःअस्यैतिविष्णुः ५७ गत्या
दिमत्त्वाद्वीरः ५८ त्रिविधपरिच्छिन्नरहितः अनंतः ५९ धनंजयोअर्जुनः ५९ तपोवेदाश्चसत्यंचज्ञानंचब्रह्मसंस्थितं
तस्मैहितत्वाद्ब्रह्मण्यः ६१ तपादीनांकर्तृत्वाद्ब्रह्मकृत् ६२ ब्रह्मात्मनासर्वंसृजतीतिब्रह्मा ६३ बृहत्वाद्ब्रह्मणत्वात्सत्या
दिः ब्रह्मलक्षणं ६४ तपानदीनांब्रह्मविवर्द्धनाद्ब्रह्मविवर्द्धनः ६५ वेदंवेदार्थंचयथार्थंवेत्तीतिब्रह्मवित् ६६ ब्राह्मणात्मना
समस्तानांवेदानांवचनंकुर्वन्इतिब्राह्मणः ६७ ब्रह्मसंहिताकातच्छेषभूताइतिब्रह्मी ६८ वेदान्तात्मनाहानाज्ञानातिब्रह्म

ब्राह्मणाः प्रिया अस्येति ब्राह्मणप्रियः ७० महान्तः पदविक्षेपाः अस्येति महाक्रमः ७१ महज्जगदुत्पत्त्यादिकर्म अस्येति महाकर्मा ७२
येन तेजसा भास्करादयस्तेजस्विनस्तस्य महत्तेज इति महातेजाः ७३ महांश्चासावुरगश्चेति महोरगः ७४ महांश्चासौ क्रतुश्च महाक्र
तुः ७५ महांश्चासौ यज्वा च महायज्वा ७६ महांश्चासौ यज्ञश्चेति महायज्ञः ७७ महच्च तद्धविश्च ब्रह्मात्मनि सर्वं जगद्धूयत इति
महाहविः ७८ स्तवैः स्तूयते न स्तोता कस्यचिदिति स्तव्यः ७९ अत एव स्तवप्रियः ८० येन स्तूयते तत् स्तोत्रं ८१ स्तुतिः स्तव
न क्रिया ८२ स्तोतापि स एव ८३ प्रियं रणं अस्य पंचमहायुधानि धत्ते लोकरक्षणार्थं अतो रणप्रियः ८४ कलाभिः शक्तिभिः पूर्णः ८५

लोको ब्राह्मणप्रियः ७१ महाक्रमो महाकर्मा महातेजा महोरगः
महाक्रतुर्महायज्वा महायज्ञो महाहविः ७२ स्तव्यः स्तवप्रियः
स्तोत्रं स्तुतिः स्तोता रणः प्रियः पूर्णः पूरयिता पुण्यः पुण्यकी
र्तिरनामयः ७३ मनोजवस्तीर्थकरो वसुरेता वसुः प्रदः वसु १२
प्रदो वासुदेवो वसुर्वसुमना हविः ७४ सद्गतिः सत्कृतिः सत्तास

नकेवलं पूर्णः सर्वेषां संपद्भिः इति पूरयिता ८६ स्मरणेन कल्मषाणि क्षपयतीति पुण्यः ८७ पुण्या कीर्तिरस्येति पुण्यकीर्तिः ८८
आन्तरबाह्यैः व्याधिभिर्न पीड्यत इति अनामयः ८९ मनस्तो वेगवद्वेगो अस्य सर्वगत्वादिति मनोजवः ९० चतुर्दश विद्यानां
बाह्यविद्यासमयानां च प्रणेता चेति तीर्थकरः ९१ वसुः सुवर्णं अस्य रेतो अस्येति वसुरेताः ९२ वसु धनं प्रकर्षेण ददातीति
वसुप्रदः ९३ वसुः प्रकृष्टो मोक्षाख्यं फलं भक्तेभ्यः प्रददातीति द्वितीयो वसुप्रदः ९४ वसुदेवस्यापत्यं वासुदेवः ९५
अविशेषेण सर्वेषु विषयेषु वसति भूतानि तत्र वसन्तीति वसुः ९६ वसु मनो अस्येति वसुमनाः ९७ ब्रह्म हविरिति भगव
द्वचनाद्धविः ९८ ब्रह्मास्मीति ये विदुस्तैः सद्भिः प्राप्यत इति सद्गतिः ९९ सती कृतिर्जगद्रक्षणलक्षणा यस्मात् तेन स
त्कृतिः १०० सजातीयविजातीयस्वगतभेदरहितः सत्ता १

भूतानि मुख्येन वसंतीति भूतावासः ८
स एव परमात्मा चिदात्मको बाधाभावसमानत्वात् सद्भूतिः २ सतां तत्त्वविदां प्रकृष्टमयनं इति सत्परायणः ३ शूरा वीराः यस्य
सेना स शूरसेनः ४ यदूनां प्रधानत्वाद्यदुश्रेष्ठः ५ सतां विदुषां आश्रयः सन्निवासः ६ शोभना यामुना यमुनासंबंधिनः परिवेष्टारो अस्येति सुयामु
नः ७ वसंति त्वयि भूतानीति भूतावासः वासुदेवः ९ सर्वासवो मुख्याः प्राणाः जीवात्मके यस्मिन् निलीयन्ते इति सर्वासुनिलयः १० शक्तिसंपदा
नास्य विद्यत इत्यनलः ११ धर्मविरुद्धपथि स्थितानां दर्पं हरतीति दर्पहा १२ तन्मनो अधर्मवर्त्मनि वर्तमानानां दर्पं ददातीति द
र्पदः १३ स्वात्मामृतरसास्वादाद् दृप्त इति दृप्तः १४ दुःखेन हृदये धार्यत इति दुर्धरः १५ शत्रुभिर्न पराजित इत्यपराजितः १६

द्भूतिः सत्परायणः शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः
७५ भूतावासो वासुदेवः सर्वासुनिलयोऽनलः दर्पहा दर्पदो
दृप्तो दुर्धरोऽथापराजितः ७६ विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्ति
रमूर्तिमान् अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ७७ ए
को नैकः सवः कः किं यत्तत्पदमनुत्तमं लोकबंधुर्लोकना

विश्वं मूर्तिर्यस्य स विश्वमूर्तिः १७ महती मूर्तिरिति महामूर्तिः १८ ज्ञानमयी स्वेच्छया तेजस्वी मूर्तिः सा अस्येति दीप्तमूर्तिः
१९ न विद्यते मूर्तिरिति अमूर्तिमान् २० अवतारेषु बह्वीर्मूर्तीर्भजत इति अनेकमूर्तिः २१ मूर्तित्वेन यज्ज्यते इति अव्यक्तः २२
नानाविकल्पजा मूर्तयः संविदाकृताः संतीति शतमूर्तिः २३ विश्वादिमूर्तित्वं अस्य आननं शताननः २४ त्रिविधभेद
विनिर्मुक्तत्वादेकः २५ मायया अनेकरूपत्वान्नैकः २६ सोमो यत्राभिषूयते सो ध्वरः सवः २७ कः शब्दः सुखवाचकः तेन स्तू
यत इति कः २८ सर्वपुरुषार्थस्वरूपत्वात् ब्रह्मैव विचार्यमिति किं २९ यच्छब्देन ब्रह्म निर्दिश्यत इति यत् ३० तनोतीति त
त् ३१ पद्यते मुमुक्षुभिरिति पदं अनुत्तमं पदमिति एकं नाम ३२ आधारभूते अस्मिन् सकला लोकाः बध्यंते इति
लोकबंधुः ३३ लोकैर्याच्यते इति लोकनाथः ३४

मधुकुलेजातत्वान्माधवः ३५ भक्तानांस्नेहीभक्तवत्सलः ३६ सुवर्णमिववर्णोस्यास्तीतिसुवर्णवर्णः ३७ हेमवदंगंवपुरस्यास्तीतिहे
मांगः ३८ वराणिशोभनान्यंगानिअस्येतिवरांगः ३९ चंदनेनाक्षादेर्भूषणैरंगदैःकेयूरैर्भूषितेइतिचंदनांगदि ४०
वीरान्हिरण्यकशिपुप्रभृतीन्हंतीतिवीरहा ४१ समोनास्यविद्यतेइतिविषमः ४२ शून्यवत्शून्यः ४३ घृतात्प्रार्थनाअ
स्येतिघृताशीः ४४ न स्वरूपात्चलनेननविद्यतेइत्यचलः ४५ वायुरूपेणचलतीतिचलः ४६ अनात्मवस्तुषुअभिमानो
अमानी ४७ तत्वविदांअनात्मनिआत्माभिमानंखंडयतीतिमानदः ४८ सर्वैःपूजनीयैःइतिमान्यः ४९ चतुर्दशानांलो
कानांईश्वरत्वाल्लोकस्वामी ५० त्रीन्लोकान्धारयतीतित्रिलोकधृक् ५१ शोभनामेधाअस्येतिसुमेधा ५२ मेधेऽध्व

थोमाधवोभक्तवत्सलः ७८ सुवर्णवर्णोहेमांगोवरांगश्चंदनां
गदी वीरहाविषमःशून्योघृताशीरचलश्चलः ७९ अमानी
मानदोमान्योलोकस्वामीत्रिलोकधृक् सुमेधामेधजोधन्यः १२
सत्यमेधाधराधरः ८० तेजोवृषोद्युतिधरःसर्वशस्त्रभृतांव
रः प्रग्रहोनिग्रहोव्यग्रोनैकशृंगोगदाग्रजः ८१ चतुर्मूर्तिश्च

रेजायतेइतिमेधजः ५३ कृतार्थत्वाद्धन्यः ५४ सत्याअवितथामेधाअस्येतिसत्यमेधाः ५५ शेषादिरूपःअशेषांधरांधारयतीतिधराधरः ५६ तेजो
सिअंशांसिक्तादशादित्यरूपेणवर्षतीतितेजोवृषः ५७ द्युतिंकांतिंधारयतीतिद्युतिधरः ५८ सर्वशस्त्रभृतांवरः सर्वज्ञः ५९ भक्तैरुपहृतंप
त्रपुष्पादिकंप्रगृह्णातीतिप्रग्रहः ६० स्वभावेनसर्वाणिनिगृह्णातीतिनिग्रहः ६१ भक्ताभिलाषप्रदानेषुव्यग्रइतिव्यग्रः ६२ चतुःशृंगो
नैकशृंगः ६३ अग्रेजायतइतिगदाग्रजः ६४ गदोनामश्रीवासुदेवस्यअवरजस्तस्यअग्रेजात इत्यर्थः ६४ चतस्रोमूर्तयोवि
राड्सूत्राव्याकृततुर्यात्मनोयुक्तिचतुर्मूर्तिः ६५
अस्य

चत्वारोबाहवोअस्येतिचतुर्बाहुः ६६ चत्वारःपुरुषव्यूहाअस्येतिचतुर्व्यूहः ६७ चतुर्णांआश्रमाणांवर्णानांगतिःचतुर्गतिः
६८ अंतःकरणादिचतुष्टयंआत्माअस्येतिचतुरात्मा ६९ पुरुषार्थचतुष्टयंउत्पद्यतेयस्मादितिचतुर्भावः ७० चतुर्णां
वेदानांअर्थंवेत्तीतिचतुर्वेदवित् ७१ एकःपादोअस्येतिएकपात् ७२ संसारचक्रस्यसम्यगावर्त्तकइतिसमावर्तः ७३
निवृत्तःआत्माविषयेभ्यःइतिनिवृत्तात्मा ७४ जेतुंनशक्यतइतिदुर्जयः ७५ भवद्भिरुत्वादस्याज्ञानातिकामीनीतिदुरति
क्रमः ७६ दुर्लभाभक्तालभ्यत्वाद्दुर्लभः ७७ दुःखेनयज्ञायतेइतिदुर्गमः ७८ अंतरायप्रतिहतेदुःखादवाप्यतेइतिदु
र्गः ७९ दुःखेनअवाप्यतेचित्तेयो गिभिःसमाधावितिदुरावासः ८० दानवान्हंतीतिदुरारिहा ८१ शोभनेरंगेध्येयत्वा

तुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः चतुरात्माचतुर्भावश्चतुर्वेदविदेकपात्
८२ समावर्त्तोनिवृत्तात्मादुर्जयोदुरतिक्रमः दुर्लभोदुर्गमोदुर्गो
दुरावासोदुरारिहा ८३ शुभांगोलोकसारंगःसुतंतुस्तंतुवर्द्धनः
इंद्रकर्मामहाकर्माकृतकर्माकृतागमः ८४ उद्भवःसुंदरःसु
दोरत्ननाभःसुलोचनः अर्कोवाजसनःशृंगीजयंतःसर्ववित्

शुभांगः ८२ लोकानांसारंसारंगवद्गृह्णातीतिलोकसारंगः ८३ शोभनःतंतुःविस्तीर्णःप्रपंचोअस्तीतिसुतंतुः ८४
तमेवतंतुंवर्द्धयतीतितंतुवर्द्धनः ८५ इंद्रस्यकर्मेवास्यकर्मेतिइंद्रकर्मा ८६ महांतिवेदादीनिभूतानिअस्येतिमहा
कर्मा ८७ कृतमेनकर्तव्यमितिकृतकर्मा ८८ कृतोवेदात्मकोआगमोअस्येतिकृतागमः ८९ उत्कृष्टंजन्मस्वेच्छ
याभजतेइतिउद्भवः ९० सर्वातिशायित्वात्सुंदरः ९१ सुष्ठुउंदद्दातीतिसुंदः ९२ करुणाकरइत्यर्थः रत्नवत्सुंदरानाभि
रस्येतिरत्ननाभः ९३ शोभनेलोचनेज्ञानमस्येतिसुलोचनः ९४ ब्रह्मादिभिःपूज्यतमैरर्चनीयत्वादर्कः ९५ वाजम
न्नंअन्नार्थीनांददातीतिवाजसनः ९६ प्रलयांभसिशृंगवान्मत्स्यरूपीशृंगी ९७ अरीन्अतिशयेनजयतिसजयंतः ९८
सर्वविषयज्ञानमस्येतिसर्ववित् हिरण्याक्षादीन्जेतुंशीलमस्येतिजयी सर्वविद्यासौजयीचेतिसर्वविज्जयी ९९

निंदवो अवयवाः सुवर्णसदृशाः अस्येति सुवर्णबिंदुः वर्णश्च अक्षरं बिंदुश्च यस्मिन्मंत्रे स गंभ‍ात्मा सुवर्णबिंदुरित्यर्थः ८०० रागद्वेषादिभिर्न क्षुभ्यत इति अक्षोभ्यः १ सर्वेषां वागीश्वराणां ब्रह्मादीनामपि ईश्वरः स सर्ववागीश्वरेश्वरः २ अवगाह्य तदानंदं विश्वस्य सुखमासत इति महाह्रदः ३ अस्य माया महती दुरत्ययेति महागर्भः ४ कालत्रयावच्छिन्नस्वेनावत्वान्महाभूतः ५ महांश्चासौ निधिश्चेति महानिधिः ६ कुं धरिणीं भारावतरणं कुर्वन्मोदयतीति कुमुदः ७ कुंदपुष्पतुल्यानि फलानि ददातीति कुंदरः ८ कुंदोपमः स्वच्छस्फटिकवन्निर्मल इति कुंदः ९ पर्जन्यवत् तापत्रयं शमयतीति सर्वकामवृष्टिरिति पर्जन्यः १० स्मृतिमात्रेण पुनातीति पावनः ११ इलति प्रेरणं करोतीति इल

वी ८५ सुवर्णबिंदुरक्षोभ्यः सर्ववागीश्वरेश्वरः महाह्रदो महाग
र्तो महाभूतो महानिधिः ८६ कुमुदः कुंदरः कुंदः पर्जन्यः पाव
नोऽनिलः अमृतांशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः ८७ सुलभः सु
व्रतः सिद्धः शत्रुजिच्छत्रुतापनः न्यग्रोधोदुंबरोऽश्वत्थश्चाणूरांध्र ९३
निषूदनः ८८ सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः अ

तत्प्रतिहितत्वादनिलः १२ आत्मा अमृततरं संश्रयतीति अमृतांशः १३ मृतं मरणं तद्वर्जितं वपुरस्येति अमृतवपुः १४ सर्वं जानातीति सर्वज्ञः १५ सर्वतोऽक्षिशिरोमुख इति सर्वतोमुखः १६ सुखेन लभ्यत इति सुलभः १७ शोभनं व्रतमस्येति सुव्रतः १८ अनन्याधीनत्वात्सिद्धः १९ सुरशत्रून् जयतीति शत्रुजित् २० तापनाःसुरशत्रूणामिति शत्रुतापनः २१ न्यक् अर्वाक् रोहतीति सर्वेषामुपरि वर्तमानमिति न्यग्रोधः २२ अंबराद्दुद्गतः कारणत्वेन इति उदुंबरः २३ श्वोऽपि न स्थाता इत्यश्वत्थः २४ चाणूरनामानं अंध्रं निषूदितवानिति चाणूरांध्रनिषूदनः २५ अनेनान्यर्चींषि यस्येति सहस्रार्चिः २६ सप्त जिह्वा अस्येति सप्तजिह्वः २७ सप्त एधांसि दीप्तयो अस्येति सप्तैधाः २८ सप्त वाहनान्यस्येति स

साम्यतनवाम्भित्ति इति अमूर्तिः ३० अघं दुःखं न विद्यते इत्यनघः ३१ प्रमात्रादिसाक्षित्वेन सर्वत्र प्रमाणागोचरत्वादचिंत्यः ३२ असन्मार्गवर्तीनां भयं करोतीति भयकृत् ३३ वर्णाश्रमाचारवतां भयं नाशयतीति भयनाशनः ३४ सूक्ष्मातिशयशालित्वादणुः ३५ बृहत्त्वाद्बृहत् ३६ अस्थूलमित्यादिना प्रतिषेधात्कृशः ३७ स्थूल इति उपचर्यते ३८ सत्वरजस्तमसां अधिष्ठानत्वाद्गुणभृत् ३९ परमार्थतो गुणाभावान्निर्गुणः ४० अत एव महान् ४१ पृथिव्यादीनां धारकाणामपि धारकत्वान्न केनचिद्धीयत इति अधृतः ४२ स्वेन स्वस्मिन्नेव धृत इति स्वधृतः ४३ पद्मोदरदलनाभं अभिरूपतमं अस्य आस्यमिति स्वास्यः ४४ सर्ववंशात्प्राग्वंशो यस्मादित्यत इति प्राग्वंशः ४५

मूर्त्तिरनघोऽचिंत्यो भयकृद्भयनाशनः ८९ अणुर्बृहत्कृशः स्थूलो
गुणभृन्निर्गुणो महान् अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्द्ध
नः ९० भारभृत्कथितो योगी योगीशः सर्वकामदः आश्रमः श्रम
णः क्षामः सुपर्णो वायुवाहनः ९१ धनुर्द्धरो धनुर्वेदो दंडो दमयिता
दमः अपराजितः सर्वसहो नियंता नियमो यमः ९२ सत्ववान्सात्वि

वंशं प्रपंचं वर्द्धयति इति वंशवर्द्धनः ४६ अनंतरूपेण भुवो भारं बिभर्तीति भारभृत् ४७ वेदादिभिः स्वयमेव परत्वेन इति कथितः ४८ योगो ज्ञानं तेनैव गम्यत्वाद्योगी ४९ योगीनामीशः योगीशः ५० सर्वान्कामान्ददातीति सर्वकामदः ५१ सर्वेषां संसारारण्ये भ्रमतां विश्रामस्थानत्वादाश्रमः ५२ अविवेकिनां संतापयतीति श्रमणः ५३ क्षीणाः प्रजाः सर्वाः करोतीति क्षामः ५४ शोभनानि पर्णानि छंदांसि संसारतरुरूपिणोऽस्येति सुपर्णः ५५ वायुर्वहति यद्भीत्या भूतानि स वायुवाहनः ५६ धनुर्द्धरः दाशरथिः ५७ धनुर्वेदं वेत्तीति धनुर्वेदः ५८ दमनं दमयितॄणां दंडः ५९ वैवस्वतादिरूपेण प्रजा दमयतीति दमयिता ६० दमो दंडकार्यं फलं तच्च स एवेति दमः ६१ शत्रुभिर्न पराजित इत्यपराजितः ६२ सर्वान्शत्रून्सहत इति सर्वसहः ६३ सर्वान्स्वेषु कृत्येषु व्यवस्थापयतीति नियंता ६४ नियमो नियतिः ६५ तस्य न विद्यत इति अयमः ६६ नास्य विद्यते यमो मृत्युरित्ययमः शौर्यवीर्यादिकं सत्वमस्यास्तीति सत्ववान् ६७ सत्वगुणप्राधान्येन स्थित इति सात्विकः ६८

सत्सा धुत्वात्सत्यः ८९ चोदनालक्षणधर्मे नियत इति सत्यधर्मपरायणः ७० अभिप्रेतपुरुषार्थकांक्षिभिः मुख्येन प्रयते स्मिन्नेय इ
तिअभिप्रायः ७१ प्रियाणि इष्टानि अर्हतीति प्रियार्हः ७२ लक्षणपूजाप्रशंसाः स्तुतिनमस्कारादिभिर्योग्यः अर्हः ७३ स्तुत्यादिभिः
भजतां प्रियं करोतीति प्रियकृत् ७४ स्तुत्यादिभिर्भजतां प्रीतिं वर्धयन् इति प्रीतिवर्धनः ७५ विहायसं विहायसं गतिराश्रयो
अस्येति विहायसगतिः ७६ स्वत एव ज्योतनादिति ज्योतिः ७७ शोभना द्युतिर्दीप्तिरस्येति सुरुचिः ७८ समस्तदेवतोद्देशेन क
र्मसुहुतं भुंक्ते इति हुतभुक् ७९ त्रयाणां लोकानां प्रभुत्वाद्विभुः ८० रविः आदित्यात्मा ८१ विविधं रोचत इति विरोचनः ८२ सूते सूर्य
स्सूत्यर्थः ८३ सर्वजगत्प्रसवितासविता ८४ रविलोचने चक्षुरस्येति रविलोचनः ८५ त्रिविधपरिच्छेदरहितः अनंतः ८६ हुतं भुन

क्तः सत्यः सत्यधर्मपरायणः अभिप्रायप्रियार्होर्हः प्रियकृत्प्रीतिवर्द्ध
नः ९३ विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः रविर्विरोचनः
सूर्यः सविता रविलोचनः ९४ अनंतोहुतभुग्भोक्ता सुखदो नै
कजोग्रजः अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ९५ स १४
नात्सनातनतमः कपिलः कपिरव्ययः स्वस्तिदः स्वस्तिकृत्स्वस्ति

ज: २

क्तीति हुतभुक् ८७ प्रकृतिं भोग्यां अचेतनां भुंक्ते इति भोक्ता ८८ सुखं मोक्षं ददातीति सुखदः ८९ धर्मगुप्तये असकृत्कायमा
नत्वान्नैकजः ९० अग्रेजायत इति अग्रजः ९१ अवाप्तसर्वकामत्वान्निर्वेदोऽस्य नास्तीति निर्विण्णः ९२ साधुष्वसतः अभेसु
ख्येन मृष्यत इति सदामर्षी ९३ त्रयो लोका अस्मिन्नधितिष्ठंतीति लोकाधिष्ठानं ९४ ब्रह्म इति श्रवणमननादिभिर्ये दुर्निरूप्य
मः अद्भुतः ९५ सनात् इति निपातः अल्पत्वे प्रथमे द्विज इत्यर्थः ९६ सर्वकारणत्वाद्विरिंच्यादीनामपि सनात
नानां सनातनत्वात्सनातनतमः ९७ वडवानलस्य कपिलो वर्णत्वात्कपिलः ९८ कं जलं रश्मिभिः पिबन् कपिः ९९
अप्ययं प्रलये तस्मिन्न विपयन्तीति अव्ययः १०० भक्तानां स्वस्ति मंगलं ददातीति स्वस्तिदः १ तदेव करोतीति स्वस्तिकृ
त् २ मंगलस्वरूपं स्वात्मीयं स्वस्ति

रथं

तदेव भुंक्ते इति स्वस्तिभुक् ४ स्वस्तिरूपेण वर्धते स्वस्ति दातुं समर्थः स्वस्तिदक्षिणः ५ कर्म रौद्रं कामः क्रोधश्च रौद्रं त्रयम
स्य नास्तीति अरौद्रः ६ शेषरूपी नागकुंडली मनस्तत्वात्मकं सुदर्शनं विचक्रं धत्ते इति चक्री ७ विक्रमः पदविक्षेपः शौर्यं म
स्येति विक्रमी ९ श्रुतिस्मृतिलक्षणं ऊर्जितं शासनमस्येति ऊर्जितशासनः १० शब्देन स्तुमशक्यत्वाच्छब्दातिगः ११
तमेव सर्वे वेदास्तात्पर्येण वदंतीति शब्दसहः १२ तापत्रयाजितत्वानां विश्रामत्वाच्छिशिरः १३ संसारिणां आत्म
शर्वरीवत् शर्वरीज्ञानिनां करोतीति शर्वरीकरः २४ क्रौर्यं नाम मनोधर्मस्तन्नास्तीति अक्रूरः १५ कर्मणा मनसा पेशल
त्वात्पेशलः १६ प्रपंच एतस्मिन्नियत इति दक्षः १७ दक्षतेर्गच्छतीति दक्षिणः १८ क्षमावतां योगिनां धारकश्रेष्ठः क्ष

स्वस्तिभुक्स्वस्तिदक्षिणः ९६ अरौद्रः कुंडली चक्री विक्रम्यूर्जि
तशासनः शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ९७ अक्रू
रः पेशलो दक्षो दक्षिणः क्षमिणांवरः विद्वत्तमो वीतभयः पु
ण्यश्रवणकीर्तनः ९८ उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्न
नाशनः वीरहा रक्षणः संतो जीवनः पर्यवस्थितः ९९ अनं

तिक्षमिणांवरः १९ निरस्तातिशयज्ञानं येषामिति विद्वत्तमः २० विगतं भयं संसारलक्षणं अस्येति वीतभयः २१
पुण्यकरं श्रवणं कीर्तनमस्येति पुण्यश्रवणकीर्तनः २२ संसारसागरात् उत्तारयतीति उत्तारणः २३ दुःकृतिः पा
पसंज्ञितां नाशयतीति दुःकृतिहा २४ स्मरणादि कुर्वतां पुण्यं करोतीति पुण्यः २५ भाविनोऽनर्थस्य सूचकान् दुःस्व
प्नान्नाशयतीति दुःस्वप्ननाशनः २६ विविधा संसारिणां गतिः मुक्तिप्रदानेन हंतीति वीरहा २७ सत्वगुणमधिष्ठा
य जगत्त्रयं रक्षतीति रक्षणः २८ सन्मार्गवर्तिनः संतः २९ सर्वाः प्रजाः प्राणरूपेण जीवयतीति जीवनः ३० परितः स
र्वतः विश्वं व्याप्य व्यवस्थित इति पर्यवस्थितः ३१ प्रपंचरूपेण स्थित इति अनंतरूपः ३२ ॥ ॥

र्ष्वं वस्तूपेण स्थित इति अनंतरूपः ३२ अपरिमिता श्री अस्येति अनंतश्रीः ३३ मन्युः कोपो जितो येन स इति जितमन्युः ३४ भयं संसारजं अपहंति इति भयापहः ३५ आयसर्वेन श्रुतरस्त्रः ३६ पुंसां कर्मानुरूपं फलं यच्छतीति गभीरात्मा ३७ वि विधानि फलानि अधिकारिभ्यो विशेषेण दिशतीति विदिशः ३८ विविधाज्ञां शक्रादीनूकार्यनूयादिशः ३९ समस्तानां कर्मणां फलानि दिशतीति दिशः ४० आदिकारणं अस्य न विद्यते इत्यनादिः ४१ भूर्भुवः भूम्या इति भूर्भुवो लक्ष्मीः ४२ शो न विविधं सूरीणां इति सुवीरः ४३ रुचिरं कल्याणं अंगदं अस्येति रुचिरांगदः ४४ जंतून्जनयतीति जननः ४५ जनस्य जननी अनो जन्म उद्भवः जन्यादिः मूलकारणमिति जनजन्मादिः ४६ भयहेतुत्वाद्भीमः ४७

नरूपोनंतश्रीर्जितमन्युर्भयापहः चतुरस्रो गभीरात्मा विदिशो व्यादिशो दिशः १०० अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिरांगदः जननो जनजन्मादिर्भीमो भीमपराक्रमः १ आधारनिलयो धाता पुष्पहासः प्रजागरः ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः २ प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः तत्त्वं तत्त्व १५

असुरादीनां भयहेतुत्वाद्भीमपराक्रमः ४८ पृथिव्यादीनां पंचधातूनां आधारः आधारत्वात् आधारनिलयः ४९ स्वात्मनः अन्यो धाता नास्तीति अधाता ५० कुसुमानामनासितानां पुष्पाणां हासवत्प्रपंचरूपेण विकासोस्येति पुष्पहासः ५१ नित्यप्रबुद्धस्वरूपत्वात् प्रजागरः ५२ सर्वेषामुपरिस्थित इत्यूर्ध्वगः ५३ सतां कर्माणि सत्पथाचारः एष इति सत्पथाचारः ५४ अमृतानीव प्राणदः ५५ प्रणवो परमात्मावाचकः ५६ पण व्यवहारे पणति व्यवहरति पणः ५७ प्रमितिः संवित्स्वयंप्रमाणं ५८ प्राणिनि प्राणजीवः ... नीयो श्वसत्पर इति प्राणनिलयः ५९ पोषयन्नन्नरूपेण प्राणानिति प्राणभृत् ६० प्राणिनो जीवयन् प्राणाख्यैरिति प्राणजीवनः ६१ तत्त्वं नाम अमृतं परमार्थं त्वमित्यर्थः ६२ तत्त्वं स्वस्वरूपं यथावज्जानातीति तत्त्ववित् ६३

न

विकार

एकश्चासावात्मा चेति एकात्मा ६४ षड्भावविकाररहितः जन्ममृत्युजरातिगः ६५ भूर्भुवः स्वः समाख्यानि त्रीणि लोकानि ... भूर्भुवः स्वस्तरुः ६६ संसारसागरात्तारयतीति तारः ६७ सर्वस्य लोकस्य जनक इति सविता ६८ पितामहस्यापि पिता इति प्रपितामहः ६९ समस्तो यज्ञः ७० यज्ञानां पतिः स्वामी इति यज्ञपतिः ७१ यजमानतः तिष्ठन् यज्वा ७२ यज्ञांगो ... नियज्ञांगः ७३ यज्ञान् वहतीति यज्ञवाहनः ७४ यज्ञं बिभर्ति पातीति यज्ञभृत् ७५ जगदुद्दोषयज्ञं करोतीति यज्ञकृत् ७६ यज्ञानां तत्समाराधनात्मन ... ंअस्यास्तीति यज्ञी ७७ यज्ञं भुनक्तीति यज्ञभुक् ७८ यज्ञः साधनं तत्प्राप्तानीति यज्ञसाधनः ७९ यज्ञस्यांतकृत्

विदेकात्मा जन्ममृत्युजरातिगः ३ भूर्भुवस्वस्तरुस्तारः सविता प्रपितामहः यज्ञो यज्ञपतिर्यज्वा यज्ञांगो यज्ञवाहनः ४ यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः यज्ञांतकृद्यज्ञगुह्यमन्नमन्नाद एव च ५ आत्मयोनिः स्वयंजातो वैखानः सामगायनः देवकीनंदनः स्रष्टा क्षितीशः पापनाशनः ६ शंखभृन्नंदकी चक्री

त्समाप्तिं करोतीति यज्ञांतकृत् ८० यज्ञानां गुह्यं ज्ञानं तद्यज्ञगुह्यं ८१ अद्यते अत्ति च भूतानीत्यन्नं ८२ अन्नं अत्तीत्यन्नादः ८३ आत्मयोनिः उपादानकारणं ... दिति आत्मयोनिः ८४ निमित्तकारणं अपि स एवेति दर्शयतीति स्वयंजातः ८५ विशेषेण खननेन वैखानः धरणीं विशेषेण खात्वा पाताले ... हिरण्याक्षं वराहरूपेण आस्थाय जघानेति वैखानः ८६ साम गायतीति सामगायनः ८७ देवक्याः सुतो देवकीनंदनः ८८ सर्वलोकस्रष्टृत्वात् स्रष्टा ८९ क्षितेः भूमेः ईशो दशरथात्मजः क्षितीशः ९० कीर्तितः ध्यातः पूजितः संस्मृतः पापराशिं नाशयन् पापनाशनः ९१ पांचजन्याख्यं भूतादिकाराख्यं अहंकारं शंखं बिभर्तीति शंखभृत् ९२ विद्यामयो नंदकाख्योसिः अस्तीति नंदकी ९३ मनस्तत्त्वात्मकं चक्रमस्यास्तीति चक्री ९४

ईदृशं शार्ङ्गाख्यं धनुर्नाम धनुरस्यास्तीति शार्ङ्गधन्वा ९९५ कौमोदकीनाम्नीं गदां धारयन् गदाधरः ९९६ रथाङ्गं चक्रमस्य पाणौ स्थितमिति रथाङ्ग
पाणिः ९९७ अत एव क्षोभयितुं न शक्यत इत्यक्षोभ्यः ९९८ एतावन्त्यायुधानि अस्येति नियमो नास्ति नियम्यते अपितु सर्वाण्येव प्रहरणायु

शार्ङ्गधन्वा गदाधरः रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः ॥ सर्वप्र
हरणायुधों नम इति   इति श्री विष्णोर्दिव्यसहस्रनामस्तोत्रं संपूर्णं
लिखितं दामोदर शंकरेण ॥ ॥शिवमस्तु॥ ॥शुभं भवतु॥

६

न्यायुधा

धान्यस्येति सर्वप्रहरणायुधः ९९९ आयुधत्वेन प्रसिद्धानि करचरणादीनि आयुधानि भवंति इत्यनेन सर्वप्रहरणायुधत्व
च दिव्य वर्णसंख्या निर्दिश्यन्ते १००० ॐकार मंगलार्थः ॐकारश्चाथशब्दश्च द्वावेतौ ब्रह्मणः पुरा कंठं भित्वा विनि
र्यातौ तस्मान्मांगलिकावुभौ   ॐ नम इत्युक्त्वा परिचरणं कृतवान्   इति नाम्नां दशशतकं